International Journal of Multidisciplinary Horizon

ISSN:3049-2017
IJMH 2025; 2(3): 89-94
© 2025 IJMH
www.themultijournal.com
Received: 05-06-2025
Accepted: 27-06-2025
Publish : 28-06-2025

**श्रीकान्त विश्वास**
शोधछात्रः,अद्वैतवेदान्तविभागः,
राष्टियसंस्कृतविश्वविद्यालयः,
तिरुपति

**Correspondence:**
**श्रीकान्त विश्वास**
शोधछात्रः,अद्वैतवेदान्तविभागः,
राष्टियसंस्कृतविश्वविद्यालयः,
तिरुपति

# दक्षिणामूर्तिस्तोत्रेऽद्वैततत्त्वानां सम्वन्धः

**श्रीकान्त विश्वास**

**शोधसारः(Abstact) –**

स्तूयते अनेन इति स्तोत्रम्। येन स्तूयते तत् स्तोत्रं, गुणसंकीर्तनात्मकम्। स्तवनात् ज्ञायते इति स्तोत्रम् इत्यपि वक्तुं शक्यते। स्तवः, स्तुतिः, नुतिः इत्यनर्थान्तरम्। एवं च श्रद्धानदीविमलचित्तजलाभिषेकैः वाक्कुसुमैश्च क्रियमाणं यत् देवताराधनं तदेव स्तोत्रमिति निश्चप्रचम्। सुविशाले संस्कृतसाहित्ये स्तोत्रसाहित्यमपि विशिष्टस्थानं समलङ्करोति। संस्कृतसाहित्यं द्वेधा विभज्यते - वैदिकसाहित्यं, लौकिकसाहित्यञ्चेति। तत्र वैदिकसाहित्ये वेदाः, उपवेदाः, वेदाङ्गानि, ब्राह्मणानि, दर्शनानि, पुराणानि, लौकिकसाहित्ये च रामायणमहाभारतादि आर्षकाव्यानि, खण्ड़काव्यानि, नाटकानि, गद्यपद्यमय-चम्पूकाव्यानि संगृहीतानि। एषु साहित्यप्रकारेषु दध्नि नवनीतमिव, तिले तैलमिव स्तोत्राणि अन्तर्भूतानि सन्ति।

प्राचीनवेदसाहित्यादारभ्य अर्वाचीनसाहित्यपर्यन्तं तत्र तत्र स्तोत्राणि विलसन्ति। स्तोत्रसाहित्यस्य स्वकीयं महत्वपूर्ण स्थानं विद्यते एव। स्तोत्रकाव्येषु कवयः भगवतः महिमवर्णनद्वारा भक्तिभावसमन्वितां परमात्मप्रार्थनां कुर्वन्ति। स्तोत्रसाहित्यं गीतिकाव्यामिति प्रथितम्। गीतिकाव्यानि स्तोत्राणि मानवेषु विशेषेण विद्यमानं भावशक्तिं प्रचोद्य तान् भगवद्भक्तिमार्गे गन्तुं समुपकुर्वन्ति। संसारचक्रे भम्भ्रम्यमाणाः संसारिणो जीवाः अनन्यभक्त्या परमात्मानं स्तुत्वा स्वेषां नैजस्वरूपं परमात्मानमेव प्राप्नुवन्ति। यथा तड़ागाद्युदकं सूर्यकिरणैः सूक्ष्मरूपेणाभ्रं भूत्वा वृष्टिरूपेण पुनः पूर्ववत् जलभावं भजते, तथा परब्रह्मणः सकाशात् समुत्पन्नाः परमार्थतः परंज्योतिस्वरूपाः जीवाः संसारे निमग्नाः तापत्रयसंतप्ताः सद्गुरूपदेशेन परमात्मनः मायाकल्पितानि नैकविधानि रूपाणि श्रद्धाभक्तिपुरस्सराः निरन्तरं स्तुवन्ति। एवं क्रमशः स्तोत्रेण निर्मलान्तःकरणाः परमात्मसाक्षात्कारमनुभूय परंज्योतिस्वरूपं स्वस्वरूपं भजन्ते।

एतादृशं स्तोत्रसाहित्यं द्विविधं वर्तते। कानिचन स्तोत्राणि केवलभक्तिप्रधानानि आत्मसमर्पणरूपेण निर्णीतानि। कानिचन भक्त्यात्मसमर्पणं भगवदाराधना सहितं वेदान्ततत्त्वमपि बोधयन्ति। तादृशस्तोत्राणि बहूनि उपलभ्यन्ते।

**वेदः -** "विद् ज्ञाने" इति ज्ञानार्थकात् विद्धातोः घञि प्रत्यये कृते निष्पद्यतेऽयं वेदशब्दः। विद्सत्तायामित्यपि धातोः वेदशब्दस्य सिद्धिः भवति। **"विद्यन्ते ज्ञायन्ते लभ्यन्ते वा एभिः धर्मादिपुरुषार्थाः इति वेदाः"** इति वेदशब्दस्य व्युत्पत्तिलभ्योऽर्थः। वेदस्य सर्वज्ञानमयत्वं प्रतिपादयता मनुना उक्तम् -

**यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्तितः।**
**स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः॥**[1]

प्राधान्येन वेदशब्दः ऋक्यजुः सामाथर्वनामभिः प्रचलितानां वेदसंहितानां बोधकः। परन्तु सोऽयं वेदः त्रयीति पदेन परिभाष्यते। वस्तुतो वेदरचनायाः त्रैविध्यमेव वेदानां त्रैय्यत्वे बीजम्। या पद्यमयी सा ऋक् इति, यत् गद्यमयं तत् यजुः, यत् पुनर्गानमयं तत् सामेति उच्यते। पुनश्च प्रत्येकस्य वेदस्य संहिता-ब्राह्मण-आरण्यक उपनिषद्-भेदेन चत्वारः भागाः सन्ति। सोऽयं वेदः अर्थान्तरेण पुनः द्विविधः, प्रवृत्तिरूपः, निवृत्तिरूपश्चेति। यागयज्ञादिविषयकः प्रवृत्तिभागः। स च संहितादिषु प्रतिपाद्यते। अन्तिमभागः निवृत्तिप्रतिपादकः उपनिषद्भागः। तत्र मोक्षस्वरूपम्, आत्मस्वरुपं, तत्साधनानि च विव्रियन्ते।

**दर्शनम्**

वेदोक्ततत्त्वानि एव विभिन्नेषु दर्शनेषु प्रतिपादितानि। संस्कृतसाहित्ये दर्शनानि खल्वतीव महनीयं पदमलङ्कुर्वन्ति । तत्र दिव्यचक्षुषां महर्षीणां जगतो जटिलान् सम्प्रश्नान् सरलयितुं कल्याणकामनया

दर्शनशास्त्रमिदं सत्यासत्यनिकषलक्षणं किमपि महार्घमुपायनम्। अस्य सरहस्यस्य निगूढतमस्य प्रपञ्चस्य समाधानपथप्रदर्शकं शास्त्रमिदं किल दर्शनमित्यभिधीयते, दृश्यते ज्ञायतेऽनेन परमतत्त्वमिति तद्दर्शनमिति तद्व्युत्पत्तेः। तच्च दर्शनमास्तिकनास्तिकभेदेन द्विधा। वेदसमर्थकाः आस्तिकाः, तस्मात् वेदोक्ततत्त्वानि
आस्तिकदर्शनेषु एवोपलभ्यन्ते। अस्मात् दुःखसागरात् तर्तुं निरतिशयसुखं प्राप्तुं च नैकानि आस्तिकदर्शनानि समागतानि, तानि यथा न्याय-वैशेषिक-सांख्य-योग-मीमांसा-वेदान्तसंज्ञकानि इति। एतानि सर्वाण्यपि दर्शनानि स्वस्वमतानुसारं परम्परयापरमतत्त्वं प्रतिपादयन्ति। परन्तु, साक्षात्परमतत्त्वमोक्षप्राप्त्युपायं प्रतिपादयति वेदान्तदर्शनम्। वेदान्तेषु पुनः अद्वैतवेदान्तं सर्ववेदान्तमूर्द्धन्य-स्थानमावहति।

**अद्वैतसिद्धान्ताः-**

वेदान्तशास्त्रं भूम्ना अद्वैतवादप्रतिपादकत्वेनैव गृह्यते। एतद्वाद-प्रतिपादकं तु श्रीमद्भगवच्छङ्कराचार्यविरचितं शारीरिकं भाष्यम्। अद्वैतमते, ब्रह्मैव केवलस्य चराचरात्मकस्य प्रपञ्चस्य कारण-त्वेनोन्नीयते। आश्रीयते च तदुपोद्बलकत्वेन **यतो वा इमानि भूतानि जायन्ते'**[2]... इत्यादिका भगवती श्रुतिः। तत्र ब्रह्मातिरिक्तं न किञ्चिदन्यत् ऊरीक्रियते। **ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः** इति अद्वैतवेदान्तमीमांसायाः मौलिको सिद्धान्तः। उक्तं च -

**सदिदं परमाद्वैतं स्वस्मादन्यस्य वस्तुनोऽभावात्।**
**नह्यन्यदस्ति किञ्चित् सम्यक् परमार्थतत्त्वबोधे।। इति ।।**[3]

वेदान्तैकवेद्यमपेतब्रह्मक्षत्रादिभेदं, सर्वात्मकमेकमेवाद्वितीयं, नित्य-सिद्ध, परमान्दस्वरूपं परमब्रह्मैव विज्ञेयमिति वेदान्तमीमांसाशास्त्रं प्रबोधयति। निधर्मके ब्रह्मणि प्रतिपाद्यप्रतिपादनाद्यसम्भवात् अध्यारोपापवादन्यायमनुसृत्य विद्योपदेशः कृतः। ब्रह्मतत्त्वबुभूत्सुनां कृते नैसर्गिकीं लोकसिद्धामविद्यां विद्यमानमिव विभाव्य परमात्म-तत्त्वमुपदिशति। उपदेशानन्तरं कल्पितमपि अपवदति वेदान्तशास्त्रम्। तदुक्तं वेदान्तपण्डितैः **- अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते।**

इतश्च सगुणब्रह्म जगतः अभिन्ननिमित्तोपादानकारणमिति अद्वैत-सिद्धान्तः। तथा च एकस्यैव ब्रह्मणो निमित्तोपादानकारणत्वे लूतादृष्टान्तः अद्वैतिभिः पुरस्क्रियते यथा लूता स्वोत्पाद्यमानं तन्तुलक्षणकार्यं प्रति स्वचैतन्यप्रधानतया निमित्तं स्वशरीरप्रधानतया उपादानं कारणं भवति। एवमीश्वरस्यापि स्वचैतन्यप्रधानतया निमित्तत्वं, स्वोपाधिप्रधानतया चोपादानत्वमिति।

**अद्वैतप्रमेयाः -**

अद्वैतवादप्रवर्तकाः श्रीभगवत्पादशङ्कराचार्याः अद्वैतप्रमेयान् प्रत्य-पादयन्। ते प्रमेयाः यथा - ब्रह्म, जीवः, माया/अविद्या, विवर्तः, अध्यासः, मोक्षश्चेति। एतेषां ब्रह्मादिप्रमेयाणां परिचयः दिङ्मात्रमत्र प्रस्तूयते।

**ब्रह्म/आत्मा**

अद्वैतिनां नये तावत् आत्मैव निर्विकल्पकः, निरुपाधिकः, निर्विकारः, निरतिशयबृहद्रूपः, ब्रह्मपदेनोच्यते। तच्च ब्रह्म निर्गुणसगुणरूपेण द्विविधम्। तादृशब्रह्मस्वरूपं लिलक्षयिषुः, स्वयमाचार्यः स्वरूपलक्षणं, तटस्थलक्षणञ्चेति लक्षणद्वयं तनुते। **स्वरूपं सद् व्यावर्त्तकम्** इति स्वरूपलक्षणम्। यथा-

**सत्यं ज्ञानमनन्तं ब्रह्म । इति।**[4]

**विज्ञानमानन्दं ब्रह्म। इति।**[5]

ब्रह्मणः स्वरूपलक्षणम्। यावल्लक्षकालानवस्थितत्वे सति यत् व्यावर्त्तकं तत् तटस्थलक्षणमिति। यथा **- जगदुत्पत्तिस्थितिलयकारणं ब्रह्म** इति ब्रह्मणः तटस्थलक्षणम्। तत्र श्रुतिप्रमाणं यथा -

**यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति।**
**यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद् ब्रह्मेति।**[6]

अद्वैतनये ब्रह्म सजातीयविजातीयस्वगतभेदशून्यमस्ति। तस्मादुक्तं –

**सदेव सोम्य इदमग्र आसीत् एकमेवाद्वितीयम् । इति।**[7]

अद्वैतसिद्धान्तानुसारम् आत्मैव ब्रह्म, जीवब्रह्मणोः ऐक्यात्। तत्प्रतिपादयन्ति महावाक्यानि। यथा **- अयमात्मा ब्रह्म।** इति।[8]

अयमात्मा नोत्पाद्यो नापि विकार्यो नापि आप्यं नापि संस्कार्यो वर्तते इति समन्वयाधिकरणे सूत्रभाष्ये श्रीमद्भगवत्पादैः प्रतिपादितम्। तथा च नित्यशुद्धबुद्धमुक्तानन्दैकस्वभावः आत्मा इति निर्गलितार्थः।

**यया यया भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि।**
**सा सैव प्रक्रिया ज्ञेया साध्वी सा चानवस्थिता।। इति।।**[9]

भगवत्पादैः विवेकचूडामणिः, उपदेशसाहस्री, अपरोक्षानुभूतिः इत्यादि प्रकरणग्रन्थाः प्रणीताः । एतेषु सर्वेषु प्रकरणग्रन्थेषु अद्वितीयात्मत्तत्त्वम् अद्वैतप्रमेयाश्च शैलीभेदेन प्रतिपादितः।
करुणासागरेण आचार्यपादेन यथाकथंचित् सर्वान् जनान् अद्वैतत्तत्त्वप्रबोधेन समुद्धर्तुं प्रवृत्तेन नैकविधानि स्तोत्राणि विरचितानि, यानि सुललितपदगुम्फितानि, विविधदेवताविषयकाणि, अपामरवि-दुषामनायासेन अद्वैततत्त्वबोधकानि इति। तेषु स्तोत्रेषु ओतप्रोततया संस्फुरति औपनिषदम् अद्वितीयात्मतत्त्वं यत् प्रस्थानत्रये सविस्तारं सयुक्तिकं प्रपञ्चितम्।

**स्तोत्रणामुद्देशनिरूपणम्**

धर्मार्थकाममोक्षाख्यानां चतुर्विधपुरुषार्थानां सुसम्पादनमेव मानवजन्मनः चरमं लक्ष्यम्। पुरुषार्थसम्पादनेन मानवं जन्म सार्थकतामश्नुते। हितकारकः नियमविशेषः धर्म इति कथ्यते। स्वर्गादिफलकारणीभूताः धर्माः इति केचन। नवविधभक्त्याद्याः भगवदाराधनात्मकाः धर्माः। स्तोत्रैः धर्मसम्पादनं भवति। उक्तं च –

**श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।**
**अर्चनं वन्दनं दास्यं संख्यमात्मनिवेदनम्।। इति।।**[10]

स्तोत्रपठनेन भगवदाराधनेन च धर्म सम्पाद्य मानवः उत्कृष्टादुत्कृष्टतरं जन्म प्राप्नोति। कामाद्यरिषड्वर्गान् परित्यज्य अहं कः ? कुतः आयातः ? मम कर्तव्यं किम् ? इति आत्मचिन्तनं कार्यम्। तथा चोक्तम् **- कामं क्रोधं लोभं मोहं त्यक्त्वात्मानं भावय कोऽहम्।**
**आत्मज्ञानविहीना मूढा स्ते पच्यन्ते नरकनिगूढाः।। इति।।**[11]

एवं स्तोत्रेषु अनेकत्र धर्ममार्गोपदेशः कृतो वर्तते। स्तोत्रपठनात् अर्थसम्पादनमपि भवति। कनकधारास्तोत्रं, कल्याणवृष्टिस्तवः, ललितापञ्चरत्नमित्यादि स्तोत्रपठनेन जनाः श्रियादिकं प्राप्नुवन्ति। उदाहरणार्थमाह **- इमं स्तवं भगवततो विष्णोर्व्यासेन कीर्तितम्।**
**पठेद्य इच्छेत्पुरुषः श्रेयः प्राप्तुं सुखानि च।।इति।।**[12]

सौन्दर्यलहरीस्तोत्रपठनेन उपासनया च इष्टकामनासिद्धिः संजायते इति पण्डिताः आहुः। अन्तिमपुरुषार्थः तुरीयपुरुषार्थः मोक्षः। एषः नित्यत्वात् निरतिशयत्वाच्च परमपुरुषार्थ इति उच्यते। स्तोत्रपठनात् मनसः स्थैर्य सम्भवति। स्तुत्यैकनिष्ठं मनः बाह्यविषयेषु अनासक्तं सत् प्रत्यगात्मनि प्रवर्तते। एवं क्रमेण चित्तशुद्धिद्वारा स्वस्वरूपाधिगमो मोक्षः सिध्यति। भगवतः गुणानुकीर्तनेन विदेहमुक्तिः भविष्यति। भगवद्भक्तैः कृतस्तोत्राणां फलवचनमेवमुच्यते विष्णुसहस्रनामस्तोत्रे -

**इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः।**

**युज्येतात्म सुखक्षान्तिश्रीधृतिस्मृतिकीर्तिभिः।। इति।।**[13]

तथा च स्तोत्रपठनेन धनार्थी धनं प्राप्नोति, सुखार्थी सुखं, धर्मार्थी धर्म, कामार्थी कामं च प्राप्नोति, अर्थात् स्तोत्रमाध्यमेन सर्वं प्राप्तुं शक्यते इति विदुषां मतः । उक्तं च-

**धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात्।**

**कामानवाप्नुयात्कामी प्रजार्थी प्राप्नुयात्प्रजाम्।। इति ।।**[14]

एवं च स्तोत्राणाम् उद्देशः परमात्मसंप्रीतिः, चतुर्विधपुरुषार्थसिद्धिश्च इति विजानीमः।

**स्तोत्रलक्षणभेदौ**

स्तोत्रलक्षणवर्णनावसरे षड्विधं स्तोत्रलक्षणं प्रसिद्धं वर्तते। उक्तं

**नमस्कारस्तथाशीश्च सिद्धान्तोक्तिः पराक्रमः।**

**विभूतिः प्रार्थना चेति षड्विधं स्तोत्रलक्षणम्।। इति।।**[15]

१.नमस्काररूपाणि - उमामहेश्वरस्तोत्रं, मीनाक्षीपञ्चरत्नं, नर्मदाष्टकम्, अर्द्धनारीश्वरस्तोत्रम् इत्यादीनि स्तोत्राणि।

२.आशीर्वादरूपाणि - जगन्नाथाष्टकं, देवीचतुस्षष्ठ्युपचार पूजास्तोत्रम् इत्यादीनि स्तोत्राणि ।

३.सिद्धान्तरूपाणि - दक्षिणामूर्तिस्तोत्रं, हरिस्तुतिः, काशीपञ्चकम् इत्यादीनि स्तोत्राणि।

४.पराक्रमप्रकाशकानि - शिवानन्दलहरी इत्यादीनि स्तोत्राणि।

५.विभूतिपराणि - वेदसारशिवस्तोत्रं, दक्षिणामूर्तिवर्णमालास्तोत्रं, सौन्दर्यलहरी इत्यादीनि स्तोत्राणि।

६.प्रार्थनारूपाणि - मीनाक्षीस्तोत्रम्, अन्नपूर्णाष्टकं, कृष्णाष्टकम् इत्यादीनि स्तोत्राणि।

स्तोत्रसाहित्यं पुनः द्विविधमिति पूर्वमुक्तम्। कानिचन भक्तिप्रधानानि कानिचन पुनः भक्तिसहितं सिद्धान्तप्रतिपादकानि। तेषु भक्तिसहितं सिद्धान्तप्रतिपादकेषु स्तोत्रेषु अन्यतममिदं दक्षिणामूर्तिस्तोत्रम्। स्तोत्रेऽस्मिन् तत्र तत्र अद्वैतवेदान्तसिद्धान्ताः प्रपञ्चिताः सन्ति।

परमकारुणिकेन श्रीशङ्करभगवत्पादाचार्येण महानद्वैततत्त्वावबोधाय बहूनि स्तोत्राणि विरचितानि। तेषु भगवत्पादकृतस्तोत्रेषु अन्यतममिदं दक्षिणामूर्तिस्तोत्रम्। दक्षिणामूर्तिः, शिवः, शङ्करः इत्यनर्थान्तरम्। श्रीगौड़पादप्रशिष्यशङ्कराचार्यः श्रीदक्षिणामूर्तेः अवतारः एव इति विद्यारण्यपादैः प्रतिपदितम् -

**अज्ञानान्तर्गहनपतितान् आत्मविद्योपदेशै**

**स्त्रातुं लोकान् भवदवशिखातापपापच्यमानान्।**

**मुक्त्वा मौनं वटविटपिनो मूलतो निष्पतन्ती**

**शम्भोर्मूर्तिश्चरति भुवने शङ्कराचार्यरूपा।। इति ।।**[16]

पुराणानुसारं श्रीदक्षिणामूर्तिः युवावस्थायां वटवृक्षस्याधः स्ववृद्धशिष्यानामात्मैक्योपदेशं कृतवान् आसीत्। तेन व्याख्यानेन शिष्याः निवृतसंशयाः जाताः इति। तथा चोक्तम् -

**चित्रं वटतरोर्मूले वृद्धाः शिष्याः गुरुर्युवा।**

**गुरोस्तु मौनं व्याख्यानं शिष्यास्तु च्छिन्नसंशयाः ।। इति।।**[17]

तं दक्षिणामूर्तिमाधारीकृत्य प्रपञ्चितं स्तोत्रमिदं दक्षिणामूर्तिस्तोत्रम्। स्तोत्रेऽस्मिन् दशश्लोकाः सन्ति। तेषु सर्वेषु श्लोकेषु अद्वैततत्त्वानि गुम्फितानि। प्रत्येकश्लोकस्यान्तिमपादे **तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये** इति वर्णितमस्ति। तस्मात् प्रथमेऽन्तिमपादस्य विमर्शः अत्र प्रदर्श्यते।

**दक्षिणामूर्तिः –**

दक्षिणा दिगभिमुखा मूर्तिः यस्य सः दक्षिणामूर्तिः, शिवः इत्यर्थः। पुनश्च दक्षिणो जगत्सृष्टिस्थितिविषये समर्थश्चासौ अमूर्तिश्च अशरीरश्च इति दक्षिणामूर्तिः। उक्तं च तत्त्वसूधाटीकायां-**श्रिया-अनाद्यचिन्त्य-मायाशक्त्या, दक्षिणः सृष्टिस्थित्यन्तविरचना-निपुणश्चासौ परमार्थत अमूर्तिश्च आकारविशेषरहितः। अस्थूलमनणु इत्यादिश्रुतेः। इति।**[18]

दक्षिणामूर्तिः इत्यस्य निर्वचनमत्यन्तप्रसिद्धश्लोके कृतं वर्तते यथा –

**वटविटपिसमीपे भूमिभागे निषण्णं**

**सकलमुनिजनानां ज्ञानदातारमारात्।**

**त्रिभुवनगुरुमीशं दक्षिणामूर्तिदेवं**

**जननमरणदुःखच्छेददक्षं नमामि।। इति।।**[19]

इत्थं श्रीदक्षिणामूर्तेः व्याख्यानं बहुत्र कृतं वर्तते। सच्चिदानन्दस्वरूपात्मसाक्षात्कारः गुरुप्रसादादेव संभवति। **स्वीयं साम्यं विधत्ते**[20] शतश्लोक्याः प्रारम्भिकश्लोके गुरुः स्वशिष्यान् स्वसमानं ब्रह्मदर्शिरूपेण द्रष्टुमिच्छति। पुनश्च परमेश्वरस्य कृपादृष्टिं विना सद्गुरुसच्छास्त्रे न लभ्येते। उक्तं च पण्डितैः - **यावन्नानुग्रहः साक्षाज्जायते परमेश्वरात्।**

**तावन्न सद्गुरुं कश्चित् सच्छास्त्रमपि विन्दति ।। इति ।।**

अस्य स्तोत्रस्य पठनेन गुरुपरमात्मनोः ऐक्यं ज्ञायते। गुरुपरमात्मनोः अभेदः बहुषु श्लोकेषु मुनिभिः प्रतिपादितः। यथा – **परमाद्वैतविज्ञानं कृपया वै ददाति यः।**

**सोऽयं गुरुर्गुरुस्साक्षाच्छिव एव न संशयः।।**[21]

गुरुरीश्वरयोः अभेदः मानसोल्लासे प्रतिपादितः - **ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने।**

**व्योमवद्व्याप्तदेहाय दक्षिणामूर्तये नमः।। इति।।**[22]

**नमः** - स्तोत्रस्यास्य प्रत्येकश्लोकस्यान्तिमपादे गुरुपरमात्मनोः अभेदं प्रदर्श्य ताभ्यां नमः इति शब्दस्य प्रयोगः कृतः। तस्मादत्र नमः इति शब्दस्य विमर्शमकृत्वा अग्रे गन्तुमशक्यम्। अत्र प्रयुक्तस्य नमः इत्यस्य शब्दस्य प्रह्वीभावः इत्यर्थः। प्रह्वीभावश्च स्वात्मनः परमेश्वरे एकत्वेन समर्पणम्। अनेन नमः शब्देन जीवपरमात्मनोः अभेदभावनैव परिस्फुटिता भवति। श्रुतिरपि नमः इत्यस्य ऐक्यमिति अर्थ स्पष्टयति। उक्तं च - **नमस्त्वैक्यं प्रवदेत्। इति।**[23]

इतश्च सूतसंहिताटीकायामपि प्रह्वीभावस्य वर्णनमस्ति यथा - **अस्य च प्रह्वीभावस्य पर्यवसानभूमिमाह-प्रह्वता नामेति। न्यग्भावेन**

**नमस्कर्तव्यप्रत्यासत्तिः प्रह्वत्वम्। तच्च मायया परशिवस्वरूपाद्भेदेन परिकल्पितस्य जीवस्य पुनस्तत्स्वरूपेण तादात्म्यलक्षणे सम्बन्धे विश्राम्यतीत्यर्थः।**[24]

तस्मात् अस्य स्तोत्रस्य प्रत्येकश्लोकस्यान्तिमपादस्य तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये इत्यस्य अर्थः यत् गुरुपरमात्मनोः अभेदः इति। गुरुः परमात्मा-जीवश्च एक एव। एतेषां मध्ये नास्ति किञ्चिदपि भेदः इति।

**विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतं**
**पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया।**
**यः साक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं**
**तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।**

**अन्वयः -** दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतं विश्वं यथा निद्रया तथा आत्मनि मायया बहिरुद्भूतमिव पश्यन् यः प्रबोधसमये अद्वयं स्वात्मानमेव साक्षात्कुरुते, तस्मै श्रीगुरुमूर्तये श्रीदक्षिणामूर्तये इदं नमः।

**व्याख्या-** दर्पणदृश्यमाननगरीतुल्यं-दर्पणे दृश्यमाना नगरी, दर्पणदृश्यमाननगरी, तत्तुल्यं(तत्समानं) दर्पणदृश्यमाननगरी-तुल्यमिति। निजान्तर्गतं निजम् अन्तः गतः इति। स्वस्वरूपे स्थितम् इत्यर्थः। विश्व-दृश्यमानं सर्वमिदं जगत्। यथा निद्रया-स्वप्नवत्। तथा आत्मनि - तथैव आत्मनि, मायया-माया द्वारा। बहिरुद्भूतमिव-स्वस्मात् बाह्यदेशे आविर्भूतमिव। पश्यन् - अवलोकयन्, यः श्रीदक्षिणामूर्तिः(प्रपञ्चाधिष्ठानभूतः प्रत्यगात्मा)। प्रबोधसमये-गुरूपदिष्टवेदान्तवाक्यात् ज्ञानोत्पत्तिकाले। अद्वयं प्रपञ्चद्वयरहितं, स्वात्मानमेव सच्चिदानन्दात्मकमेव। साक्षात्कुरुते सच्चिदानन्दात्म-कब्रह्माहमस्मीति अनुभवति। तस्मै - उक्तरूपाय, श्रीगुरुमूर्तये-साक्षात्कृतब्रह्मतत्त्वपुरुषाय, श्रीदक्षिणामूर्तये-दक्षिणदिक् अभिमुखा मूर्ति यस्य, तस्मै इदं नमः।

**भावार्थ :-** श्लोकेऽस्मिन् प्रत्यगात्मनः सकलजगदधिष्ठानत्वं प्रतिपादित-मस्ति। अर्थात् सकलप्रपञ्चोऽयं प्रतीचि अध्यस्त एव। यो निजान्तर्गतं भूतभौतिकरूपं विश्व स्वात्मनि अनाद्यनिर्वाच्यया मायया स्वस्मात् बहिः (पृथक्) उद्भूतमिव पश्यन्नाचार्योक्तमहावाक्य- साक्षात्कारा-नन्तरं स्वप्रकाशात्मकमद्वय-मात्मानं साक्षात्कुरुते, तस्मै श्रीदक्षिणामूर्तये गुरवे नमः इति। तत्र दृष्टान्तमाह दर्पणदृश्य-माननगरीतुल्यमिति। यथा स्वच्छे निरन्ध्रेऽसङ्गे आदर्श नानोपवनयुक्ता नगरी दृस्यते, तथैव स्वच्छे निरन्ध्रेऽसङ्गेऽत्मनि उच्चावच्चात्मकस्य प्रपञ्चस्य भानम्। अर्थात् आत्मनि प्रपञ्चो वस्तुतोऽसन्नपि सन्निव इव भाति। दर्पणदृश्यमाननगरीतुल्यं विश्वं वर्तते बहिरविद्यमानस्य बहिरवभासे दृष्टान्तं वदन् प्रबोधनिवर्त्यत्वमपि द्रढयति। यथा कश्चित् सुप्तो निजान्तर्गतमेव पूर्वपूर्वसंस्काराहितं वासनामयं विश्व निद्रया बहिर्विषयत्वेनाविर्भूतमिव पश्यन् जाग्रदवस्थायामागतायां सति स्वात्मनमद्वयं स्वप्नप्रपञ्चरहितमिति जानाति तथैव प्रकृते इति।

**विमर्शः -** सर्वज्ञाः भगवान् भाष्यकाराः श्रीशङ्कराचार्यः लोका-नुग्रहैकप्रयोजनकृतशरीर परिग्रहाः सकलवेदान्तदुग्धाब्धेः स्वानुभव-मन्दरेण विचारनिर्मन्थनादाविर्भूताद्वैतामृतस्य विन्यासकलसभूतं श्रीदक्षिणामूर्तिस्तोत्रं सकललोकानुजिघृक्षया भोगप्रदपरमेश्वरमोक्ष-प्रद्गुरूणामत्यन्ताभेदबोधकं रचयामासुः। आदौ प्रत्यगात्मचैतन्यस्य सकलजगदधिष्ठानत्वेन परमेश्वरतां दर्शयन् विश्वमिति अनेन स्तोत्रस्यारम्भः कृतः।

**प्रत्यगात्मनः जगदधिष्ठानत्वम्-** विश्वं (चराचरात्मकानेक-कर्तृभोक्तृसंयुक्तं) दर्पणदृश्यमाननगरीतुल्यमिति अत्र विचार्यते। यथा स्वच्छे दर्पणे प्रतिबिम्बितं सर्वं वस्तुजातं नगरी पुरी वा मिथ्या तथैव दृश्यमानं विश्वमपि मिथ्या। अभिप्रायस्तु नानोपवनां दक्षिणोत्तरतोऽतिमनोहर मार्गद्वयविभूषितां अनेकक्रीड़ाशिखरियुक्तां नानाविधजनसङ्कलां नानाविधप्रासादयुतां नगरीं स्रष्टुं यानि उपादानकारणानि तानि सर्वाणि तस्मिन् आदर्श न सन्ति, तथापि स्वच्छे नीरन्ध्र दर्पणे यथोक्तविशेषणयुक्तनगरी दृश्यते। अर्थात् कारणानामभावेऽपि प्रतीतिमात्रं भवति, तस्मात् तत् दर्पणदृश्यं सर्वं मिथ्या। तत्सर्वं दर्पणे एव अधिष्ठितं सत् प्रतीयते मात्रम्। तथैव निर्विकारे नीरन्ध्रेऽतिस्वच्छेऽसङ्गे सूक्ष्मे प्रतीचि तद्विपरीतस्य विकारस्य विचित्रस्य जगतः स्थितिः भवति। तथा च निर्विकारे स्वच्छे शुद्धे ब्रह्मणि जगत्स्रष्टुमुपादानकारणत्वं नास्ति, तथापि मायया जगत् ब्रह्मणि विवर्तते। विवर्तश्च अतात्त्विकोऽन्यथाभावः, तस्माज्जगन्मिथ्या। मिथ्याभूतस्य जगतः अधिष्ठानं ब्रह्मैव। तस्मात् दृश्यं सर्वं जगत् दर्पणदृश्यतुल्यम्। तदुक्तं विद्यारण्यस्वामिना -

**निश्छिद्रदर्पणे भाति वस्तुगर्भं बृहज्जगत्।**
**सच्चित्सुखं तथा नानाजगद्गर्भमिदं वियत्।। इति।।**[25]

लघुयोगवासिष्ठेऽपि शिलोपाख्याने इदमुक्तम् –

**द्यौ क्ष्मा वायुरथाकाशः पर्वतास्सरितो दिशः।**
**सन्ति तस्यां शिला सा च सुषिरा न मनागपि।। इति।।**
**अत्यन्तघननाङ्गायास्सुनीरन्ध्राकृतेरपि।**
**विद्यतेऽन्तर्जगद्वन्द्वं व्योम्नीव विततोऽनिलः।। इति।।**[26]

तथा च विवेकचूडामणौ यत्रैष जगदाभासः दर्पणान्तःपुरं यथा ' इति प्रतिपादितम्। अस्य पादस्य व्याख्यानावसरे जगद्गुरु श्रीश्रीचन्द्रशेखभारतीपूज्यपादैः उक्तं यत् - **स्वच्छेऽच्छिद्रे दर्पणेऽन्तः यथा पुरं जनगिरिनदीप्रासादादिरूपं पुरं प्रतिफलति अन्तरवर्तमानोऽपि दृश्यते। इति।**[27]

विनाशात् अद्वैतात्मतत्त्वसाक्षात्कारः कथं भविष्यति ? इति मनसि आकलय्य श्रीशङ्कराचार्यैः
विरचितः तृतीयश्लोकोऽयम् -

**यस्यैव स्फुरणं सदात्मकमसत्कल्पार्थकं भासते**
**साक्षात् तत्त्वमसीति वेदवचसा यो बोधयत्याश्रितान्।**
**यत्साक्षात्करणाद् भवेन्न पुनरावृत्तिर्भवाम्भोनिधौ**
**तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।३।।**

**अन्वयः -** यस्य सदात्मकं स्फुरणमेव असत्कल्पार्थकं भासते। यः आश्रितान् तत्त्वमसि इति वेदवचसा साक्षात् बोधयति। यत् साक्षात्करणात् भवाम्भोनिधौ पुनः आवृत्तिः न भवेत्, तस्मै श्रीगुरुमूर्तये श्रीदक्षिणामूर्तये इदं नमः।

**व्याख्या -** यस्य - चिदात्मनः परमेश्वरस्य, सदात्मकं सद्रूपं, स्फुरणमेव स्वरूपप्रकाशः, असत्कल्पार्थकं असत्कल्पः असत्तुल्यः योऽनिर्वाच्यः, भासते प्रकाशते। यः गुरुरूपपरमेश्वरः, आश्रितान् - विधिवत्

उपसन्नानाम्, तत्त्वमसि इति वेदवचसा तत् सर्वज्ञपरमेश्वरः त्वं किञ्चिज्ज्ञोऽसि इति वेदवाक्येन, साक्षात् - अपरोक्षत्वेन तत्त्वं, बोधयति -ज्ञापयति। यत्साक्षात्करणात्-यस्य स्वप्रकाशचिदात्मनः साक्षात्करणात्, भवाम्भोनिधौ-संसारसागरे (भवे अम्भः भवाम्भः, भवाम्भसां निधि तस्मिन् इति), पुनः भूयः, आवृत्तिः-आगमनं, न भवेत्-न स्यात् इति। तस्मै संसारसागरोद्धारकाय श्रीदक्षिणामूर्तये इदं नमः।

**नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभास्वरं**
**ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिः स्पन्दते।**
**जानामीति तमेव भान्तमनुभात्येतत् समस्तं जगत्**
**तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥**

**अन्वयः -** नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभास्वरं यस्य ज्ञानं चक्षुरादिकरणद्वारा बहिः स्पन्दते, जानामीति भान्तं तमेव एतत् समस्तं जगत् अनुभाति, तस्मै श्रीगुरुमूर्तये श्रीदक्षिणामूर्तये इदं नमः।

**व्याख्या -** नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभास्वरं अनेकानि च्छिद्राणि यस्मिन् सः नानाच्छिद्रः, स चासौ घटश्चेति, तस्योदरे मध्ये स्थितो यो महादीपः अक्षुद्रदीपः, तस्य प्रभावत् भास्वरम् अनन्याधीनालुप्तप्रकाशस्वरूपम् इति। यस्य चिदात्मनः घटवदनेकच्छिद्रयुक्तं देहे अन्तः करणे प्रतिबिम्बितस्य, ज्ञानं चैतन्यं, चक्षुरादिकरणद्वारा-चक्षुश्श्रोत्रादीनि यानि करणानि विषयोपलब्धिसाधनानि तद्द्वारा, बहिः विषयदेशे, स्पन्दते-गच्छति। जानामीति- अहमिदं जानामीति स्वगतेन निरपेक्षप्रकाशरूपेण विषयमवभासयन् यः स्वयमेव भासते, भान्तं प्रकाशमानं, तमेव साक्षित्वेनावस्थितं परमेश्वरमेव, अनु-पश्चात्, एतत्-विविधशब्दप्रत्ययगम्यं, समस्तं सर्वं जगत्-प्रपञ्चः। भाति-प्रकाशते। तस्मै श्रीगुरुमूर्तये श्रीदक्षिणामूर्तये इदं नमः ।

**भावार्थ : -** श्लोकेऽस्मिन् आत्मसत्तया एव सर्वमिदं जगत् भातीति प्रतिपादितम् । प्राध्यामेव जगतः सत्ताप्रकाशौ इत्यत्र प्रमाणीकृतम् । तदवबोधाय दृष्टान्तमाह-

तदर्थं तेषां मतानि श्लोकेऽस्मिन् प्रपञ्यन्ते -

**देहं प्राणमपीन्द्रियाण्यपि चलां बुद्धिं च शून्यं विदुः**
**स्त्रीबालान्धजडोपमास्त्वहमिति भ्रान्ताः भृशं वादिनः।**
**मायाशक्तिविलासकल्पितमहाव्यामोहसंहारिणे**
**तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥**

**अन्वयः -** देहं, प्राणम्, इन्द्रियाणि अपि चलां बुद्धिं शून्यं च वादिनः स्त्रीबालान्धजडोपमाः भ्रान्ताः भृशं तु अहमिति विदुः। मायाशक्तिविलासकल्पितमहाव्यामोहसंहारिणे, तस्मै श्रीगुरुमूर्तये श्रीदक्षिणामूर्तये इदं नमः ।

**व्याख्या -** देहं - शरीरं (सशिरस्कं पिण्डं), प्राणम् - प्राणापानादिपञ्चवृत्त्यात्मको मुखनासिकासञ्चारिणो वायुः, इन्द्रियाणि - चक्षुश्श्रोत्रादीनि रूपादिग्राहकाणि, अपि चलां बुद्धिं - इतोऽपि क्षणिकां बुद्धिं विज्ञानं वा, शून्यं तुच्छं, च चकारात् तार्किकाद्यभिमतात्मानम् इत्यर्थः, वादिनः चार्वाकादयः, स्त्रीबालान्धजडोपमाः स्त्रीबालान्धजडवत् विवेकज्ञानरहिताः, भ्रान्ताः विवेकशून्याः तत्त्वमन्यथा मन्यमानाः, भृशं तु अहमिति विदुः तान् देहादीन् सर्वान् आत्मत्वेन जानन्ति अन्यान् उपदिशन्ति चेति। मायाशक्तिविलासकल्पित- महाव्यामोहसंहारिणे - परमेश्वरस्यानाद्यनिर्वचनीया या मायाशक्तिः परमव्यामोहिका, तस्याः विलासेनैकदेशेन कल्पितः यो महाव्यामोहः महान् अनन्तः व्यामोहः देहाद्यात्मत्वभ्रमः, तं संहर्तुं नाशयितुं शीलमस्येति सः मायाशक्तिविलासकल्पितमहा- व्यामोहसंहारी, तस्मै श्रीगुरुमूर्तये श्रीदक्षिणामूर्तये इदं नमः।

**भावार्थ : -** श्लोकेऽस्मिन् श्रीगुरुप्रसादादेव सर्वविधव्यामोहनिवृत्तिः प्रतिपादितास्ति। आत्मनः स्वरूपविषये बह्वयः विप्रतिपत्तयः सन्ति। देहव्यतिरिक्तस्य आत्मनोऽभावात् देहस्यैव गच्छामि, तिष्ठामीत्यात्मत्वानुभवात् देह एव आत्मा इति चार्वाकाः। तान् खण्डयन्तः चार्वाकैकदेशिनः आहुः - जीवात्मनिर्गमे शरीरमरणस्य दर्शनात्, वच्मि, पश्यामि इति बुद्धिदर्शनात् इन्द्रियाणि एव अत्मा। पुनश्च अन्ये इन्द्रियाणां नाशेऽपि प्राणसत्वे जीवदर्शनात् प्राण एव आत्मा। अन्ये मन अत्मा इति वदन्ति। योगाचाराः तु मम मन इति भेददर्शनात् क्षणिका बुद्धिः एव आत्मेति वदन्ति। पुनः माध्यमिकाः विद्युदभ्रनिमेषवत् क्षणिकस्य बुद्धेः इत्थं चार्वाकादीनां वादिनामात्मस्वरूपे भ्रान्तिः वर्तते। सा च भ्रान्तिः मायाशक्तिविलासेन पञ्चमश्लोके तावत् आत्मस्वरूपे बह्वयः विप्रतिपत्तयः प्रदर्शिताः। देहादिषु अनात्मसु आत्मबुद्धिः येषां वर्तते, तेषु सुषुप्तौ कस्याप्यनुपलम्भात् शून्यमेवात्मेति माध्यमिकानां मतम्।

**उपसंहारः -** प्रस्थानत्रयभाष्यावलोड़ने असमर्थानां मन्दबुद्धीनाम् आबालवृद्धानां समुद्धरणाय परतत्त्वस्यैव नैकविधसगुणरूपाणि अनाद्यनिर्वचनीयमायाप्रयुक्तनामरूपाणि समाश्रित्य विविधदेवतास्तोत्राणि भगवत्पादशङ्कराः रचयामासुः। तेषु अन्यतमं दक्षिणामूर्तिस्तोत्रमिदम्। स्तोत्रमिदं स्वीकृत्य मयात्र विमर्शः कृतः। वेदकालतः स्तोत्रसाहित्यपर्यन्तं या अभिवृद्धिः तत्र चिन्ता कृता। तावत् प्रत्येकस्य श्लोकस्य अन्वयव्याख्याभावार्थसहितं विमर्शः कृतःप्रस्था-नत्रयात्मकं वेदान्तमीमांसाशास्त्रं प्रमेयबाहुल्यसंवलितम्। तेषु अत्यन्तप्रधानविषयाः यथा - निर्गुणं ब्रह्म, सगुणं ब्रह्म, आत्मनः स्वप्रकाशत्वम्, जगन्मिथ्यात्वम्, अध्यासः, अवस्थाः, स्वप्नजागरितयोः तुल्यत्वम्, मोक्षसाधनं, मोक्षः इत्यादि प्रमेयाः स्तोत्रेऽस्मिन् उपनिबद्धाः। तेषां प्रमेयाणां यथास्तोत्रं विमर्शः कृतः। तथा च निर्गलितोऽर्थोऽयं यत् पञ्चश्लोकपरिमितं दक्षिणामूर्तिस्तोत्रमिदम् अद्वैतवेदान्तप्रकरणरूपं, सामान्यधिषणानाम् अज्ञानान्धकारनिवर्तकं, परमात्मतत्त्वावेदकम्, विद्वज्जनानाञ्च अनायासेन नैकधा परमात्मतत्त्वप्रतिपादकमिति।

**सहायकग्रन्थसूची -**

१. पञ्चदशी - विद्यारण्यस्वामी चौखम्बा विद्याभवनम् - २००३

२.विवेकचूडामणिः- श्रीशङ्कराचार्याः श्री अभिनवविद्यातीर्थ-विद्यानिधिः - १९८२

३.वेदन्तसारः - श्रीमद्सदानन्दयतिः चौखम्बा कृष्णानन्दाकाडेमी

४.वेदान्तपरिभाषा - श्रीधर्मराजाध्वरीन्द्रः चौखम्बा संस्कृत सीरीज, वारणासी-२००५

५.ब्रह्मसूत्रशाङ्करभाष्यम् - श्रीशङ्कराचार्याः मोतिलाल वनारसि-दास, वारणासी २००२

६.SRI DAKSINA MURTISTOSTRAM D.S. SUBBARAMAIYA DAKSHINAMNAYA SRI SHARDA PEETHAM-1988

७.श्रीदक्षिणामूर्तिस्तोत्रम्- सम्पादकः एन्. एस्. वेङ्कटनाथाचार्यः - प्राच्यविद्यासंशोधनालयः मैसूरू - १९७२

८.भगवद्गीताशाङ्करभाष्यम् श्रीशङ्कराचार्याः गीताप्रेस, गोरखपुरम् - २०५९ (सं)

९.माण्डूक्यकारिका - गौड़पादाचार्यः .

१०.छान्दोग्योपनिषद् गीताप्रेस्, गोरखपुरम् २०५९ (सं)

११.संक्षेपशारीरकम् - सर्वज्ञात्ममुनिः - वारणसी – १९४४

**पाद टिप्पणी:**

1 मनु.- 2-3

2 तैत्तिरीयोपनिषत् – 3.1

3 विवेकचूडामणिः - 228

4 तैत्तिरीयोपनिषत् – 2.1.1

5 बृहदारण्यकोपनिषत् – 3.9.28

6 छान्दग्योपनिषत् – 6.2.1

7 मुण्डकोपनिषत् - 2

8 बृह.वा.

9 भागवत् – 7.5.23

10 मो.मु.स्तोत्र - 26

11 वि.स.स्तोत्र - 141

12 विष्णुसहस्रनामस्तोत्र -132

13 वि.स.स्तोत्र -124

14 सां. भां.

15 शं.दि – 4.60

16 स्तोत्ररत्नमाला

17 तत्त्वसुधा - 1

18 स्तोत्ररत्नमाला

19 शावरभास्य

20 तत्त्वसुधाव्याख्या

21 मा. 1.30

22 रा.पू.ता.उ -2-4

23 सू.सं.टी -4.8.10, 11

24 प.द – 13-101

25 योगवार्तिक – 6.4.8

26 वि. चू.म.टी - 292